विषवेगाश्च सप्त स्युर्धातोर्धात्वन्तरार्पितः ॥
विषदंष्ट्री ललाटं यात्यतो नेत्रं ततो मुखम् ।
आस्याच्चरणनाभी द्वौ धातून् प्राप्नोति हि
क्रमात् ॥”
इत्याग्नेये २९४ अध्याये लक्षणानि ॥*॥
अग्निरुवाच ।
“मन्त्रध्यानौषधैर्दष्टचिकित्सां प्रवदामि ते ।
ॐ नमो भगवते नीलकण्ठायेति ॥
जपनाद्विषहानिः स्यादौषधं जीवरक्षणम् ।
साज्यं सक्षद्रसं पेयं द्विविधं विषमुच्यते ॥
जङ्गमं सर्पमूषादि शृङ्गादि स्थावरं विषम् ।
शान्तस्वरान्वितो ब्रह्मा लोहितं तारकः शिवः॥
विषते नाम मन्त्रोऽयं तार्क्षः शब्दमयः स्मृतः ।
ज्वल महामते हृदयाय । गरुड़विलासशिरसे ।
गरुड़शिखायै । गरुड़विषभञ्जन २ प्रभेदन २ ।
वित्रासय २ विमर्द्दय २ कवचाय । अप्रति-
हतशासनं वं हूँ फट् अस्त्राय । उग्ररूप-
धारक सर्व्वभयङ्कर भीषय २ सर्व्वं दह २
भस्मीकुरु कुरु स्वाहा नेत्राय ।
समवर्णान्तयुग्माष्टदिग्दलस्वरकेशरात् ।
वर्णरत्नं बहिर्वाभूत् कर्णिकं मातृकाम्बुजम् ।
कृत्वा हृदिस्थं तन्मन्त्री वामहस्ततले स्मरेत् ॥
अङ्गुष्ठादौ न्यसेद्वर्णान् विषभेदोदिताः कलाः ।
पात्रं वज्रचतुष्कोणं पार्थिवं शक्रदैवतम् ॥
वृत्तार्द्धमाप्यं पद्माढ्यं शुक्लं वरुणदैवतम् ।
त्र्यस्रं स्वस्तिकयुक्तञ्च भेषजं वह्निदैवतम् ॥
वृत्तबिन्दुवृतं वायुदैवतं कृष्णमानिलम् ।
अङ्गुष्ठाद्यङ्गुलीमध्ये पर्व्वास्तेषु स्ववेश्मसु ॥
सवर्णनागवाहनवेष्टितेषु न्यसेत् क्रमात् ।
विषते चतुरो वर्णान् स्वमण्डलसमत्विषः ।
अरूपे वरतन्वाचे आकाशे शिवदैवते ॥
कनिष्ठामध्यपर्व्वान्ते न्यसेत्तस्याद्यमक्षरम् ।
नागानामादिवर्णांश्च स्वमण्डलगतान्न्यसेत् ॥
भूतादिवर्णान् विन्यस्य अङ्गुष्ठाद्यन्तपर्व्वसु ।
तन्मात्रादिगुणाद्यर्णानङ्गुलीषु न्यसेद्बुधः ॥
स्पर्शनादेव तार्क्ष्येण हस्ते हन्याद्विषद्वयम् ।
मण्डलादिषु तान् वर्णान् विषते करयोर्जितान्॥
ज्येष्ठाद्यङ्गुलिभिर्देहनाभिस्थानेषु पर्व्वसु ।
स्वजीवतः सवर्णाभमानाभे स्तुहिनप्रभम् ॥
कुङ्कुमारुणमाकण्ठादाकेशान्तात् सितेतरम् ।
ब्रह्माण्डव्यापिनं तार्क्ष्यं चन्द्राख्यं नागभूषणम् ॥
नीलाभ्रनासमात्मानं महापक्षं स्मरेद्बुधः ।
एवं तार्क्ष्यात्मनो वाक्यान्मन्त्रः स्यान्मन्त्रिणो विषे
स्वस्ति तार्क्ष्यकरस्यान्तःस्थिताङ्गुष्ठविषापहा ।
तार्क्ष्यहस्तं समुद्यम्य तत्पञ्चाङ्गुलिचालनात् ॥
कुर्य्याद्विषस्य स्तम्भादींस्तदुक्तमदवीषया ।
आकाशादेशभूबीजः पद्माङ्काधिपतिर्मनुः ॥
संस्तम्भयेति वीषान्तो भाषया स्तम्भयेद्विषम् ।
व्यत्यस्तभूषया बीजो मन्त्रोऽयं साधुसाधितः ॥
सम्प्लवः प्लावयश्चास शब्दाद्यः संहरेद्विषम् ।
दष्टमुत्थापयेद्देवं स्वजस्त्राओऽभिषेकतः ॥
स्वजसशङ्खभेर्य्यादिनिस्वनश्रवणेन वा ।

संदष्टात्येव संयुक्तो भूतेजोव्यत्ययात् स्थितः॥
भूवायुव्यत्ययान्मन्त्री विषं संक्रामयत्यसौ ।
अन्तस्थो निजवेश्मस्थो बीजाग्नीन्दुजलाम्बुभिः ।
एतत् कर्म्म नयेन्मन्त्री गरुड़ाकृतिविग्रहः ।
तार्क्ष्यं वारणगेहस्यस्तर्जनान्नाशयेद्विषम् ॥
जानुदण्डेन्दुमुदितं स्वधाश्रीबीजलाञ्छितम् ।
स्नानपानात् सर्व्वविषजरारोगापमृत्युजित् ॥
पक्षि पक्षिमहापक्षि महापक्षि विवि स्वाहा ।
पक्षिपक्षि महापक्षि महापक्षि चीची स्वाहा
द्वाविती पक्षिराड्मन्त्री विषघ्नावभिमन्त्रणात् ।
पक्षिराजाय विद्महे पक्षिदेवाय धीमहि तन्नो
गरुडः प्रचोदयात् ॥
वह्निस्थो पार्श्व ततपूर्व्वौ दन्तश्रीको च दन्तिनौ
सकलो लाङ्गलो चेति नीलकण्ठाद्यमीरितः ॥
वक्षःकण्ठशिखाखेतं न्यसेत् स्तम्भे सुसंस्कृतौ ।
हर हर हृदयाय नमः कपर्द्दिने च शिरसे
नीलकण्ठाय वै शिखाम् ॥
कालकूटविषभक्षणाय स्वाहायर्व्व वर्म्म च ।
कण्ठेनेत्रं कृत्तिवासं नेत्रं प्रत्येकशस्त्रिभिः ।
पूर्व्वादैरानर्नैर्युक्तं श्वेतपो तारुणासितैः ॥
अभयं वरदञ्चापं वासुकिञ्च दधद्भुजः ।
यज्ञोपवीतपार्श्वन्तु गौरी रुद्रोऽस्य देवता ॥
पादजानुगुह्यनाभिहृत्कण्ठाननमूर्द्धसु ।
मन्त्रार्णाद्यस्य करयोरङ्गुष्ठाद्यङ्गुलीषु च ॥
तर्ज्जन्यादितदन्तासु सर्व्वमङ्गुष्ठयोर्न्यसेत् ।
ध्यात्वैवं संहरेत् क्षिप्रं बद्धया मूलमुद्रया ॥
कनिष्ठा ज्येष्ठया बद्धा तिस्रोऽन्याः प्रसृतिर्जवः ।
विषनाशे वामहस्तमन्यस्मिन् दक्षिणं करम् ॥
नमो भगवते नीलकण्ठाय चिः । अमलकण्ठाय
चिः सर्व्वज्ञकण्ठाय चिः क्षिप ओम् स्वाहा ॥
नमो नीलकण्ठाय नैकसर्व्वविषापहाय । नमस्ते
रुद्रमन्यव इति सम्मार्ज्जनाद्विषं विनश्यति ॥
न सन्देहः कर्णजाप्या उपनेता विधानतः ।
यजेद्रुद्रविधानेन नीलग्रीवं महेश्वरम् ।
विषव्याधिविनाशः स्यात् कृत्वा रुद्र विधानतः॥”
इत्याग्नेये महापुराणे दष्टचिकित्सा नाम१९५
अध्यायः ॥ * ॥ * ॥ यात्राकाले तस्य शुभा-
शुभसूचकत्वं यथा,—
“गोनासदर्व्वीकरराजिलाद्या
जात्यैव सर्व्वे भयदा भुजङ्गाः ।
विलोक्य सर्पं यदि निर्व्विकल्पा
निवृत्तविप्रस्य शुभं विचिन्त्यम् ॥
पाषाणसंस्तम्भितकण्टकेषु
दत्त्वा पदं यान्ति विनष्टविघ्नाः ।
सर्पेच्छया पन्नगखाभिधेयः
प्रयाणकाले स तु वामभागे ।
दृष्टः शुभैः सिद्धिकृदुन्नताग्र-
स्तिष्ठेत् पथोर्द्धे यदि राज्यलाभः ॥”
इति सर्पः । इति वसन्तराजशाकुने १५ वर्गः ॥
सर्पकङ्कालिका, स्त्री, (सर्पकङ्काली एव । स्वार्थे
कन् ।) वृक्षविशेषः । तत्पर्य्यायः । तीक्ष्णा २
विषदंष्ट्रा ३ विषापहा ४ । इतिरत्नमाला ॥

सहा ५ सर्पकङ्काली ६ विषनाशिनी ७ । इति
शब्दचन्द्रिका ॥
सर्पकङ्काली, स्त्री, (सर्पस्य कङ्कालमिवाङ्गं यस्याः ।
ङीष् ।) सर्पकङ्कालिका । इति शब्दचन्द्रिका ॥
सर्पगन्धा, स्त्री, (सर्पं गन्धयति हिनस्तीति । गन्ध
हिंसने + अण् । टाप् ।) वृक्षविशेषः । यथा,
“छत्राकी सर्पगन्धा च रसना च पलङ्कषा ॥”
इति जटाधरः ॥
सर्पघातिनी, स्त्री, (सर्पं हन्तीति । हन + णिनिः ।
ङीष् ।) सर्पकङ्कालीभेदः । यथा,—
“सर्पसहा सर्पनामा सर्पाङ्गी सर्पघातिनी ॥”
इति रत्नमाला ॥
सर्पतृणः, पुं, (सर्पस्तृणमिव च्छेद्यो यस्य ।)
नकुलः । इति हेमचन्द्रः ॥
सर्पदंष्ट्रः, पुं, (सर्पस्य दंष्ट्रेव पुष्पमस्य ।)दन्ती-
वृक्षः । इति शब्दचन्द्रिका ॥
सर्पदंष्ट्रा, स्त्री, (सर्पस्य दंष्ट्रेव ।) वृश्चिकाली ।
इति रत्नमाला ॥
सर्पदंष्ट्रिका, स्त्री, (सर्पदंष्ट्रा + स्वार्थे कन् । टापि
अत इत्वम् ।) अजशृङ्गी । इति राजनिर्घण्टः ॥
सर्पदण्डा, स्त्री, (सर्पं दण्डयतीति । दण्ड + अण् ।
टाप् ।) सैंहली । इति राजनिर्घण्टः ॥
सर्पदण्डी, स्त्री, (सर्पं दण्डयतीति । दण्ड + अण् ।
ङीष् ।) गोरक्षी । इति राजनिर्घण्टः ॥
सर्पदन्ती, स्त्री, (सर्पस्य दन्त इव पुष्पमस्याः ।
गौरादित्वात् ङीष् ।) नागदन्ती । इति राज-
निर्घण्टः ॥
सर्पदमनी, स्त्री, (सर्पस्य दमनमस्याः । ङीष् ।)
वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥
सर्पनामा, स्त्री, (सर्पस्य नाम नाम यस्याः ।)
सर्पकङ्कालीभेदः । इति रत्नमाला ॥
सर्पपुष्पी, स्त्री, (सर्पस्य दन्त इव पुष्पमस्याः ।
ङीष् ।) नागदन्ती । इति राजनिर्घण्टः ॥
सर्पफणजः, पुं, (सर्पस्य फणात् जायते इति ।
जन + डः ।) सर्पफणजातमणिः । इति शब्द-
रत्नावली ॥
सर्पभुक्, [ज्]पुं, (सर्पं भुङ्क्ते इति । भुज + क्विप् ।
मयूरः । इति हेमचन्द्रः ॥ सर्पभक्षके, त्रि, ॥
सर्पमाला, स्त्री, (सर्पस्य मालेव ।) सर्पकङ्काली-
भेदः । इति काचित् रत्नमाला ॥ सर्पनामा
इति साधुपाठः ॥
सर्पराजः, पुं, (सर्पाणां राजा समासे टच् ।)
वासुकिः । इत्यमरः । १ । ८ । ४ ॥ (सर्पश्रेष्ठे,
त्रि । यथा, हरिवंशे ६८ । १५ ।
“एष मोहं गतः कृष्णो मग्नो वै कालिये ह्रदे ।
भक्ष्यते सर्पराजेन तदागच्छत मा चिरम् ॥”)
सर्पलता, स्त्री, (सर्प इव लता ।) नागवल्ली ।
इति राजनिर्घण्टः ॥
सर्पसत्त्रं, क्ली, (सर्पनाशकं सत्रम् ।)सर्पनाशक-
यज्ञविशेषः । यथा, श्रीभागवते ।१२।६।१६-२८।
“जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितम् ।
यथा जुहाव संक्रुद्धः सर्पान् सत्रे सह द्विजैः॥